Varied Advice on living life:

The power of quotes to be “the one right word, the feather at the pivot point”  (Lois McMaster Bujold)

अमन्त्रमक्षरं नास्ति
नास्ति मूलमनौषधम्
अयोग्यः पुरुषो नास्ति
योजकस्तत्र दुर्लभः

amantram akṣaraṁ nāsti
nāsti mūlam anauṣadham
ayogyaḥ puruṣo nāsti
yojakas tatra durlabhaḥ

खादन्न गच्छामि हसन्न जल्पे
गतं न शोचामि कृतं न मन्ये
द्वाभ्यां तृतीयो न भवामि राजन्
किं कारणं भोज भवामि मूर्खः ?

Khādan na gacchāmi hasan na jalpe
gataṁ na śocāmi kṛtaṁ na manye
dvābhyāṁ tṛtīyo na bhavāmi rājan
kiṁ kāraṇaṁ bhoja bhavāmi mūrkhaḥ

जलबिन्दुनिपातेन क्रमशः पूर्यते घटः ।
स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च ।।

jala-bindu-nipātena kramaśaḥ pūryate ghaṭaḥ
sa hetuḥ sarva-vidyānāṁ dharmasya ca dhanasya ca

jala-bindu - drops of water
nipātena - by the falling
kramaśaḥ - gradually
pūryate - is filled

ghaṭaḥ - the jar, vessel
sa - that
hetuḥ - cause
sarva-vidyānāṁ - of (acumulating) all knowledge
dharmasya - of (accumulating) correct behavior, action
ca - and
dhanasya - of (acumulating) wealth

By the falling of drops of water at a time the jar is gradually filled.
That ( step by step) is the cause of (attaining) all knowledge, correct behavior and wealth.

सहसा विदधीत न क्रियाम् अविवेकः परमापदां पदम्
वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः

Sahasā vidadhīta na kriyām avivekah paramāpadām padam
Vṛṇute hi vimṛśyakāriṇaṁ guṇa-lubdhāh svayam eva sampadaḥ.

How to approach action?

" Reach for the stars, if you become stuck in the treetops at least you are out of the underbrush" Charles Durr, math teacher

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहिता विरमन्ति मध्याः
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारभ्य चोत्तमनजना न परित्यजन्ति ।।२७।।

Prārabhyate na khalu vighna-bhayena nīcaiḥ
Prārabhya vighna-vihitā viramanti madhyāḥ
vighnaiḥ punaḥ punarapi pratihanyamānāḥ
Prārabhya cottama-janā na parityajanti .27. (nīti-śatakam by Bhartṛhari)

The greatest enemy of good is perfection.

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पम् अप्यस्य धर्मस्य त्रायते महतो भयात् ।।४०।।

nehābhikrama-nāśo'sti pratyavāyo na vidyate
svalpam apyasya dharmasya trāyate mahato bhayāt 2.40 (2nd chapter Bhagavad Gītā)

प्रक्षालनाद् हि पङ्कस्य दूराद् अस्पर्शनं वरम्
prakṣālanād hi paṅkasya dūrād asparśanaṁ varam

दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ४३ (nīti-śatakam by Bhartṛhari)
dānaṁ bhogo nāśas tisro gatayo bhavanti vittasya
yo na dadāti na bhuṅkte tasya tṛtīyā gatir bhavati

सत्यं ब्रूयात् प्रियं ब्रूयात्
मा ब्रूयात् सत्यमप्रियम्
satyaṁ brūyāt priyaṁ brūyāt
mā brūyāt satyam apriyam

शास्त्राण्यधीत्यापि भवन्ति मूर्खा
यस्तु क्रियावान् पुरुषः स विद्वान् ।
सुचिन्त्यम् अप्यौषधम् आतुराणां
न नाममात्रण करोत्यरोगम् ।। १२८ ।।

śāstrāṇyadhītyāpi bhavanti mūrkhā
yastu kriyāvān puruṣaḥ sa vidvān
sucintyam apyauṣadham āturāṇāṁ
na nāma-mātreṇa karotyarogam 127 (Hitopadeśa – Mitralābhaḥ)

वचनैरसतां महीयसो
न खलु व्येति महत्त्वमुद्धतैः ।
किमपैति रजोभिरौर्वरै-
-रवकीर्णस्य मणेर्महार्घता ।। १६।२७ ।।

vacanair asatām mahīyaso
na khalu vyeti mahattvam uddhataiḥ
kim apaiti rajobhir aurvarair
avakīrṇasya maṇer mahārghatā 27 (śiśupālavadhaḥ by Māgha- 16th chapter)

उद्यमेन हि कार्याणि सिध्यन्ति न मनोरथैः
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः

udyamena hi kāryāṇi sidhyanti na manorathaiḥ
na hi suptasya siṁhasya praviśanti mukhe mṛgāḥ

उद्यमेन udyamena by effort

हि hi indeed

कार्याणि kāryāṇi works, actions

सिध्यन्ति sidhyanti are accomplished

न na not

मनोरथैः manorathaiḥ by desires

न हि na hi not indeed

सुप्तस्य suptasya of the sleeping

सिंहस्य siṁhasya lion

प्रविशन्ति praviśanti

मुखे   mukhe  into the mouth

मृगाः  mṛgāḥ   deer

Indeed it is by effort that works are accomplished, not by desires.
The deer do not indeed enter into the mouth of the sleeping lion.

## भोगापवर्गार्थं दृश्यम्

bhogāpavargārtham dṛśyam
bhoga-apavargārthaṁ dṛśyam
bhoga-apavarga-arthaṁ dṛśyam